# अथुच्प्रत्ययः एकमवलोकनम्।

## **4**.भ्राजथुः।

*(डा. वि. आर्. मनोज्, व्याख्याता, श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्ची)*

वनवासकाले कदाचित् मदनशरेण विद्धा शूर्पणखा रामेणाऽदौ निरस्ता लक्ष्मणमभ्यसरत्। तस्याः श्रवणनासिके लक्ष्मणो न्यकृन्तत्। ततः सा भ्रातरौ खरदूषणौ रामेण सह योद्धुं प्रेरयामास। किमेतद्रामायणपारायणं पुनरपि ? श्रुतं श्रावयत्यनिर्गलम्! न वयं पारायणैकपरायणाः। अथुच्प्रत्ययान्तं शब्दान्तरमुद्धर्तुकामाः केवलम्। तथा हि त्रिशिरादिराक्षसनिधनप्रसङ्गे_

"केचिद्वेपथुमसेदुरन्ये........भ्राजथुं न च केचन।।" इति। (**4.43.**भट्टिकाव्यम्।)

भ्राजथुर्नाम दीप्तिः, शोभा, प्रकाशः। पराक्रमाभिमानिनो राक्षसाः रामेण पराभूताः सन्तो न अशोभन्तेति भावः।

सीतान्वेषणतत्पराः हनुमत्प्रमुखाः प्लवङ्गमाः दक्षिणामाशां मृगयन्तः श्रमापनोदनाय कस्मिँश्चित् गिरिनितम्बे निषेदुः। तत्र गुहाद्वारान्निसरतः पतत्रिणोऽपश्यन्। ततस्ते तस्यां गुहायां प्राविशन्। तत्र कोमलाङ्गीं कामपि कामिनीमद्राक्षुः। सा नानारसैः फलैः स्वादुशीतैः वारिभिश्च तान् तर्पयामास। तृप्ताः विस्मिताश्च ते तामप्राक्षुः_

"निघानिघतरुच्छन्ने तस्मिँस्ते लब्धिमैः फलैः।

तृप्तास्तां भ्राजथुमतीं पप्रच्छुः 'कस्य पूरियम् ?'।।" इति। (**7.65.**भट्टिकाव्यम्।)

किमुवाच सा ? 'दुहिता मेरुसावर्णेरहं नाम्ना स्वयम्प्रभा' इत्युवाच। भ्राजथुशब्दोऽत्र उपस्थितः। भ्राजथुमतीम् इति। शोभाशालिनीमित्यर्थः। अन्वर्थनाम्नी खल्वसौ। स्वयम्प्रभेति ह तन्नाम !

धातुपाठे 'टुभ्राजृ (भ्वा.**823**), टुभ्राशृ (भ्वा.**824**), टुभ्लाशृ (भ्वा.**825**) इत्येते त्रयो धातवः 'ट्वितः' दीप्त्यर्थकाः पठिताः। अतः अथुच्प्रत्यये भ्राजथुः, भ्राशथुः, भ्लाशथुः इति तेषां रूपाणि। समानोऽर्थश्च समेषाम्। **(4.भ्राजथुः।)**

## 5.वमथुः।

पराक्रमाभिमानिनो राक्षसाः रामेण पराभूताः निष्प्रभाः नितरां पर्याकुलाश्च बभूवुः। तथा च खरदूषणादीनां तत्सहचरानाञ्च शोचनीयतां वर्णयन् भट्टिः _

"सरक्तं वमथुं केचित्, भ्राजथुं न च केचन।।" इति। (4.43.भट्टिकाव्यम्।)

केचिद्राक्षसाः सरक्तं = सलोहितं वमथुं = छर्दिकां आसेदुरित्याशयः। अत्र 'टुवम उद्गिरणे' (भ्वा.849) इति धातुः। अस्माद्धातोः "ट्वितोऽथुच्" (पा.सू.3.3.89) इति सूत्रेण अथुच्प्रत्ययः। 'प्रच्छर्दिका वमिश्च स्त्री पुमाँस्तु वमथुः समाः' इत्यमरः। शब्दोऽयमर्थान्तरेऽपि प्रयुज्यते। यथा 'वमथुः करशीकरः' इत्यमरः। अर्थात्करिकरान्निर्गतजलकणस्यार्थेऽपि वमथुः (करशीकरः) इति प्रयोगः। करिकरो नाम गजस्य शुण्डा। (5.वमथुः।)

## 6.दवथुः।

चेदिराज्यस्य राजा शिशुपालः। दमघोषसुतः। पूर्वस्मिन् जन्मनि अयमेव हिरण्यक शिपुर्नामा दैत्यराजा यः विष्णुना नृसिंहरूपेण हतः। अयमेव तृतीयजन्मनि रावणो यस्य रामो निहन्ता। तदास्ताम्। शिशुपालाय वाग्दत्तकन्या रुक्मिणी। विदर्भराजस्य भीष्मकस्य पुत्री। परं कृष्णं कामयमाना, कृष्णेन अपहृता। एवञ्च रुक्मिणीं हरता हरिणा चैद्यो विप्रकृतः।

युधिष्ठिरस्य राजसूययागे समस्तराजानः आहूताः। यागे श्रीकृष्णमग्रिमपूजाभाजमकरोद् युधिष्ठिरः। रुक्मिणीं हरता हरिणा प्रागेव विप्रकृतश्चैद्यः कृष्णायकृतमिदमर्घ्यदानं न सेहे। यतो हि परवृद्धिमत्सरिणः खलु मानिनः। कोपाविष्टोऽसौ_

"गुरु निःश्वसन्नथ विलोलसदवथुवपुर्वचोविषम्।

कीर्णदशनाग्निकणः फणवानिवैष विससर्ज चेदिपः।।" इति। (15.62.शिशुपालवधम्।)

शिशुपालः फणीव फूत्कुर्वन् विलोलसदवथु = ससंतापम् विषप्रायं वच उज्जहार, स्वामर्षं व्यक्तीचकारेति भावः।

किमर्थोऽयमारम्भः ? अथुच्प्रत्ययान्तशब्दमुद्धर्तुमयमारम्भः। ‘दवथु’ इति। ‘टुदु उपतापे’ (स्वा.1256) इति धातोरिदं रूपम्। धातुपाठे उपतापार्थेऽयं धातुः पठितः। उपतापो रोगः इति च श्रूयते। परमिह संतापार्थता। अथवा संतापोऽपि कश्चन रोगः ? ‘संतापो रोग’ इति सज्जनः। उदाहरणान्तरमुपलभामहे भट्टिकाव्ये। त्रिशिरादिराक्षसानां निधनवर्णनाप्रसङ्गे रामास्त्रपीडितानां राक्षसानां दशामवतरन् भट्टिः_

“केचिद्वेपथुमासेदुरन्ये दवथुमुत्तमाम्।” इति। (4.43.भट्टिकाव्यम्।) अत्यधिकं परितापम् अन्वभूवन्नित्याशयः। <u>(6.दवथुः।)</u>

## <u>7.मज्जथुः।</u>

एवं भट्टिकाव्ये शूर्पणखायाः सीताग्रहणार्थं रावणप्रेरणवर्णनाप्रसङ्गे_

“तल्पे कान्तान्तरैः सार्धं मन्येऽहं धिङ्निमज्जथुम्।।” इति। (5.20.भट्टिकाव्यम्।) इद्रियार्थानां रूपसौन्दर्यादीनां सारभूतां सीतामप्राप्य अन्याभी रमणीभी रमणं (तदेव तल्पे निमज्जथुः) धिक्, निन्द्यं (धिक्कारं वा) मन्येऽहं (शूर्पणखा) इति भावः। ‘टुमस्जो शुद्धौ’ (तुदा.1416) इति धातोरिदमथुच्प्रत्ययान्तं रूपम्। <u>(7.मज्जथुः।)</u>

काव्याध्ययनं न केवलमानन्दप्राप्त्यर्थम्। विविधशास्त्राणामध्ययनाय, कोशादिपरिज्ञानाय, व्याकरणप्रयोगदर्शनाय च काव्यमुपकरोति। यद्यपि काव्यानां तत्वतोऽध्ययनं सामान्यजनस्य दुष्करं तथापि व्याख्यानसाह्येन काव्यास्वादनं सुकरं भविष्यति। कवीनां बहवः स्वकीयकाव्यगरिमाणं स्वयमेव प्रशशंसुः। यथा_

“व्याख्यागम्यमिदं काव्यम् उत्सवः सुधियामलम्।” इति भट्टिः।

“ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया।

प्राज्ञं मन्यमना हठेन पठिती मस्मिन् खलः खेलतु।” इति नैषधम्। अतो बहूनां काव्यानामध्ययने व्याख्यानमत्यन्तमनिवार्यम्। अये ! पुनरपि अथुच्प्रत्ययान्तशब्दान्तरमाविष्कर्तु

ममुं प्रयासं विदधाति कालक्षेपकलाकुशलो भवान् ! नहि नहि। उपसंहरामः। ‘अल्पसाधनैरधिकारम्भो न सुकर’ इति खलु सुधियो वदन्ति। अतो वयम् अथुच्प्रत्ययान्तशब्दानाकलयामः। पाणिनीयधातुपाठे आहत्य द्वादशैव ट्वितो धातवः। ट्वित् यो धातुस्ततोऽथुच्प्रत्यय इति हाध्यगीष्म। ते च क्रमशः तेषामथुच्प्रत्ययान्तरूपञ्च संगृह्णीमः।

| क्र.सं. | धातुः | गणसंख्या | रूपम् |
|---|---|---|---|
| 1. | ‘टुनदि समृद्धौ’ | (भ्वा.67) | नन्दथुः। |
| 2. | ‘टुओस्फूर्जा वज्रनिर्घोषे’ | (भ्वा.235) | स्फूर्जथुः। |
| 3. | ‘टुवेपृ कम्पने’ | (भ्वा.367) | वेपथुः। |
| 4. | ‘टुभ्राजृ दीप्तौ’ | (भ्वा.823) | भ्राजथुः। |
| 5. | ‘टुभ्राशृ दीप्तौ’ | (भ्वा.824) | भ्राशथुः। |
| 6. | ‘टुभ्लाशृ दीप्तौ’ | (भ्वा.825) | भ्लाशथुः। |
| 7. | ‘टुवम उद्गिरणे’ | (भ्वा.849) | वमथुः। |
| 8. | ‘टुयाचृ याच्ञायाम्’ | (भ्वा.863) | याचथुः। |
| 9. | ‘टुओश्वि गतिवृद्ध्योः’ | (भ्वा.1010) | श्वयथुः। |
| 10. | ‘टुक्षु शब्दे’ | (अदा.1036) | क्षवथुः।‘क्षयथुः’ इत्यपि प्रयोगो द्रष्टव्यः। |
| 11. | ‘टुदु उपतापे’ | (स्वा.1256) | दवथुः। |
| 12. | ‘टुमस्जो शुद्धौ’ | (तुदा.1416) | मज्जथुः। |

*******